प्रमेयतया अज्ञाननाशकज्ञानविषयतया LaCandr. 691. 42.

**अज्ञाननाशकता** ( ajñānanāśaka–tā ) *f.* the state of being the destroyer of ignorance or nescience न च ज्ञानस्य अज्ञाननाशकतापि प्रमाणसिद्धा JñānBiPra. 29. 12.

**अज्ञाननाशकत्व** ( ajñānanāśaka–tva ) *n.* the state of being the destroyer of nescience अस्मदर्थस्यैव … अज्ञाननाशकत्वम् VedāntRaMañ. 1. 1 (10. 5); साधकत्वं साक्षिणोऽज्ञाननाशकत्वेऽनुपपन्नम् GuruCandr. ii. 376. 17; चैतन्यनिष्ठाया: प्रमाणजन्यापरोक्षान्त:करणवृत्तेरेव अज्ञाननाशकत्वाङ्गीकारेऽपि न दोष: JñānBiPra. 24. 21; तस्य मन्दबुद्धीनाम्…अज्ञाननाशकत्वासामर्थ्यात् SiddhāBi. 10. 6; अन्यथा ज्ञानस्य अज्ञाननाशकत्वपक्षे घटाभाववानयं घटवानयमिति ज्ञानस्य दुर्वारत्वात् GuruCandr. i. 130. 16; ब्रह्मान्यज्ञानमात्रस्याज्ञाननाशकत्वप्रसङ्गात् GuruCandr. ii. 157. 12; शुक्त्यादिज्ञानस्याप्यज्ञाननाशकत्वस्वीकारात् GuruCandr. ii. 157. 14.

**अज्ञाननाशकनाश्यत्व** ( ajñānanāśakanāśya–tva ) *n.* the state of being destroyable by the destroyer of nescience अज्ञानप्रयुक्तत्वेनाज्ञाननाशकनाश्यत्वात् GuruCandr. i. 166. 20.

**अज्ञाननाशकभेद** ( ajñānanāśaka–bheda ) *m.* a variety of what destroys nescience व्यञ्जकेति…अज्ञाननाशकभेदेनेति यावत् LaCandr. 655. 15.

**अज्ञाननाशकवृत्ति** ( ajñānanāśaka–vṛtti ) *f.* mental modification which destroys nescience व्यञ्जकेति । अज्ञाननाशकवृत्तीत्यर्थ: LaCandr. 655. 15; व्यञ्जकभेदेन अज्ञाननाशकवृत्तिभेदेन GuruCandr. iii. 183. 22.

**अज्ञाननाशकाल** ( ajñānanāśa–kāla ) *m.* time of the destruction of nescience अज्ञाननाशकालेऽपि नष्टक्षणावच्छेदेनाधिकरणस्थूलकालमादाय न जानामीति बुद्ध्यापत्ते: GuruCandr. iii. 37. 17.

**अज्ञाननाशकृत्** ( ajñāna–nāśakṛt ) *adj.* destroyer of ignorance or nescience प्रयत्नेन विनाज्ञाननाशकृत् ध्यायिनां महत् PāraS. 6. 199 = 10. 178; आदाय वास्तवं वृत्तं ज्ञानमज्ञाननाशकृत् BṛĀraUBhVā. ii. 4. 197.

**अज्ञाननाशत्व** ( ajñānanāśa–tva ) *n.* the state of being the destruction of nescience यदज्ञाननाशत्वमज्ञानप्रयुक्तनाशत्वं च तयोरन्यतरवत्त्वं वा LaCandr. 175. 4; 500. 20; वृत्तेरज्ञाननाशत्वपक्षेऽपि तेन रूपेण वृत्तिप्रयुक्तत्वात् फलत्वम् GuruCandr. ii. 159. 20.

**अज्ञाननाशद्वार्** ( ajñānanāśa–dvār ) *f.* [Instr.] by means of the destruction of nescience तच्च अज्ञाननाशद्वारा ज्ञाने तमोनाशाधीनचाक्षुषद्वारा आलोके च बोध्यम् GuruCandr. ii. 415. 14; प्रपञ्चे साक्षात् कल्पने गौरवस्योक्तत्वेनाज्ञाननाशद्वारैव तद्वाच्यम् LaCandr. 573. 28.

**अज्ञाननाशद्वारक** ( ajñānanāśadvāra–ka ) *adj.* chanelled through the destruction of nescience तच्च ज्ञाने अज्ञाननाशद्वारकमालोके च तमोनाशजन्यचाक्षुषद्वारकम् LaCandr. 565. 17.

**अज्ञाननाशन** ( ajñāna–nāśana ) *adj.* destroying ignorance भगवंस्त्वत्प्रसादेन ज्ञातो ह्यज्ञाननाशन: । … हृद्याग: JayāS. 13. 4; PāraS. 6. 2; तीर्थमज्ञाननाशनम् । एतद्विनिर्मितं साक्षाच्छम्भुना SkandP. iii(1). 20. 8; iii(1). 30. 64; पठस्व … पुराणम् … अज्ञाननाशनं दिव्यं ज्ञानभास्करबोधकम् DevīBhāP. i. 16. 36; AdhyāRā. vi. 5. 1; *n.* destruction of ignorance ते प्रोचु: कीदृश: कोपोऽस्माकमज्ञाननाशने SamarāSaṁ. 9. 45; ज्ञातताज्ञातते न स्त: … अज्ञाननाशनात् PañcDa. 8. 23.

**अज्ञाननाशनाश्यता** ( ajñānanāśanāśya–tā ) *f.* the state of being destroyable by the destruction of ignorance or nescience अज्ञाननाश्यता-( ? नाशनाश्यता )वच्छेदकत्वस्य…आवश्यकत्वात् GuruCandr. ii. 186. 11.

**अज्ञाननाशनाश्यत्व** ( ajñānanāśanāśya–tva ) *n.* the state of being destroyable by the destruction of nescience शुक्तिरूप्यादेरज्ञानप्रयुक्तत्वादज्ञाननाशनाश्यत्वम् GuruCandr. ii. 314. 20; iii. 27. 16; अज्ञानकल्पितत्वात् अज्ञानप्रयुक्तत्वात् अज्ञाननाशनाश्यत्वात् LaCandr. 586. 12.

**अज्ञाननाशित** ( ajñāna–nāśita ) *adj.* destroyed unintentionally न्यासादिकं परद्रव्यं प्रभक्षितमुपेक्षितम् । अज्ञाननाशितं चैव येन दाप्य: स एव तत् KātySm. 596.

**अज्ञाननाशिनी** ( ajñāna–nāśinī ) *adj.* (*f.*) removing ignorance हे मोहच्छिद् अज्ञाननाशिनि Kāvyānu.( He. ) 268. 25; अज्ञाननाशिनी प्रज्ञा CāṇaNīDa. 5. 11.

**अज्ञाननाशेष्टि** ( ajñānanāśeṣṭi ) *f.* intention (i. e. acceptance) of the annihilation of nescience भेदस्य मायात्वान्माय्यात्मैकोऽस्त्यबोधदृक् । बोधादज्ञाननाशेष्टेर्मुक्तिस्स्यात् IṣṭaSi. 344. 13.

**अज्ञाननाशोत्पत्ति** ( ajñānanāśotpatti ) *f.* origination of the annihilation of nescience ज्ञानोपहितात्मनोऽज्ञाननाशत्वे ज्ञानादज्ञाननाशोत्पत्तिर्न संभवति LaCandr. 500. 35.

**अज्ञाननिगूहन** ( ajñāna–nigūhana ) *n.* hiding of ignorance अज्ञाननिगूहनार्थं तु प्रयुक्तज्ञानमेव परिहारेणाविष्करोति NyāyVār. 566. 17 (*on* v. 2. 20)

**अज्ञाननिदान** ( ajñāna–nidāna ) *adj.* based on ignorance [WBTF]

**अज्ञाननिद्रा** ( ajñāna–nidrā ) *f.* sleep in the form of ignorance or nescience अज्ञाननिद्राशयितो भवता प्रतिबोधित: । सर्वप्राणिवधादेष विरतोऽद्यप्रभृत्यहम् Nāgā. 5. 25; अज्ञाननिद्राया: प्रबुद्धो जागर्ति संयमी GītāBh.( S'aṅ. ) 68. 14 (*on* 2. 69); जाग्रत अज्ञाननिद्राया घोररूपाया: … क्षयं कुरुत KāṭhUBh. 145. 19 (*on* 3. 14); अज्ञाननिद्रया सुप्तं धर्मवाक्यानिलै: प्रबोधयेत Bārhas. 2. 66; चिरश्रुतिश्चाज्ञाननिद्राभिहननापनयनमात्रविलम्बिकैवल्याभिप्रायत्वाद्युक्ततरा PañcPra. 25. 2 ( comm. अज्ञानमेव महती निद्रा सैवाभिहननमात्मनो बन्धनमाच्छादनम् ); अज्ञाननिद्राक्षुभितो जीवो यावन्न बोधित: । तावत्पश्यति दुर्भेदं संसारारम्भविभ्रमम् YogVā. iii. 115. 16; ( किरातजनमण्डले । हस्तहार्यतम:पिण्डा बभूवासितयामिनी ) अज्ञाननिद्रानिबिडा भृङ्गपृष्ठच्छदच्छवि: YogVā. iii. 77. 15; अज्ञाननिद्राविद्राणसुप्रभातमिदं नृणाम् ( चरितं कीर्तयिष्यामि श्रीमत्पार्श्वजिनप्रभो: ) PārśvC. 1. 15.

**अज्ञाननिधि** ( ajñāna–nidhi ) *m.* store of ignorance, ignorant person सलीलमामीलितभीमचक्षुश्चक्षु:श्रवा वा सुकथाप्रसङ्ग: । सावज्ञमज्ञाननिधिर्व्यसर्पत् सर्पाधिराजोरुधनु:समीपम् SītāSva. 68.

**अज्ञाननिन्दा** ( ajñāna–nindā ) *f.* censure of ignorance अथापि ज्ञानप्रशंसा … अज्ञाननिन्दा च Nir. 1. 17 (40. 15)

**अज्ञाननिन्दित** ( ajñāna–nindita ) *adj.* censured by the ignorant तपश्च विपुलं तप्त्वा देवदानवदुश्चरम् । अर्थदेशादिसंयुक्तं गूढमज्ञाननिन्दितम् LiṅgaP. ii. 20. 10.

**अज्ञाननिबन्धन** ( ajñāna–nibandhana ) *adj.* [*f.* –ā] caused by nescience अब्रह्मात्मते यद्वदत्राज्ञाननिबन्धने BṛĀraUBhVā.( Sambandha. ) 905; अज्ञाननिबन्धन एव शरीरप्रपञ्चो न वस्तुनिबन्धन: BālaKrī. ii. 33. 16 (*on* 3. 61(?71)); जीवस्य परमात्मना विपरीतमतित्वमज्ञाननिबन्धनम् NyāySu.( Ja. ) 508B. 7 (*on* iii. 2. 10); अज्ञाननिबन्धनसंसारहेतुभूतपुण्यापुण्यकर्माचरणतद्विपाकभोगयोगादन्तवत्त्वम्…ईश्वरस्य…स्यात् VedāntKau. 210. 8 (*on* ii. 2. 4)

**अज्ञाननिबन्धनत्व** ( ajñānanibandhana–tva ) *n.* the state of being caused by ignorance न स्वपक्षसिद्ध्यसिद्धिनिबन्धनौ जयपराजयौ तयोर्ज्ञानाज्ञाननिबन्धनत्वात् PramāMi. 73. 26 (*on* ii. 1. 35)

**अज्ञाननिमित्त** ( ajñāna–nimitta ) *adj.* [*f.* –ā] caused by or based on ignorance or nescience न च अज्ञाननिमित्तं भगवत्प्रतिवचनं कल्पनीयम् GītāBh.( S'aṅ. ) 80. 3 (*on* 3. 0); अनेकजन्मान्तरसंचितैर्नरो विमुच्यतेऽज्ञाननिमित्तपातकै: UpadeSā. 302. 31; तत्त्वेन ब्रह्मणो नान्यद्वस्त्वन्तरमस्ति…। कथं तर्हि विज्ञानात्मनां नानेवोपलब्धि: । अज्ञाननिमित्तैव सा BālaKrī. ii. 31. 16 (*on* 3. 66); कर्मनिमित्तो बन्ध: कर्म त्वज्ञाननिमित्तम् NyāyRa. 668. 20 (*on* 5 (15). 101); वैलक्षण्यमात्मनो ब्रह्मणश्चान्यत्वमत्यन्तमविद्यमानमेवाज्ञाननिमित्तमज्ञाने विनष्टे स्वयमेव विलीयते S'āstrDī. 113. 29 (*on* i. 1. 5); बन्धश्चाज्ञाननिमित्त: NyāyMa. 282. 6; अज्ञाननिमित्तो बन्धो ज्ञाननिमित्तश्च मोक्ष: सुप्रसिद्ध: TattvPrakā. 151A. 2 (*on* iii. 2. 5)

**अज्ञाननिमित्तता** ( ajñānanimitta–tā ) *f.* the state of being caused by ignorance ज्ञानाज्ञाननिमित्ततया प्रतीतयोरपि स्वप्नाविर्भावतिरोधानयो: परमात्माधीनत्वमेव TattvPrakā. 151A. 4 (*on* iii. 2. 5)

**अज्ञाननिमित्तत्व** ( ajñānanimitta–tva ) *n.* the state of being caused by ignorance अज्ञाननिमित्तत्वात्स्वप्नप्रतीतेस्तत्तिरोधानं ज्ञानेन युक्तम् TattvPrakā. 151A. 2 (*on* iii. 2. 5); त एव परमाणव: प्रतिसंधीयमाना नाज्ञाननिमित्तत्वेऽवस्थिता: ĀtmaTaVi. 804. 21.

**अज्ञाननिम्नपथ** ( ajñānanimna–patha ) *adj.* going down towards wrong knowledge यदस्य अज्ञाननिम्नपथं बहिर्मुखं विषयोपभोगफलं चित्तमासीत् RājMār. 80. 6.

**अज्ञाननियम** ( ajñāna–niyama ) *m.* necessary presence of ignorance न चाग्रे वक्ष्यमाणार्थानामारम्भदशायामज्ञाननियम: श्रुतशास्त्रेभ्यस्तद्ज्ञानसंभवात् S'ivārkaMaDi. i. 83. 5 (*on* i. 1. 1)

**अज्ञाननिरास** ( ajñāna–nirāsa ) *m.* removal of ignorance संवेदनस्य प्रकाश्यत्वात् प्रकाशकत्वमसिद्धमिति चेत् न अज्ञाननिरासादिद्वारेण प्रकाशकत्वोपपत्ते: PramāMī. 4. 1 (*on* i. 1. 3); SyādvāMañ. 12 (58); ज्ञानमज्ञाननिरासस्यैव निदानम् PrakaVi. 3. 6.

**अज्ञाननिरूपक** ( ajñāna–nirūpaka ) *adj.* correlating non-cognition यदि च विषयसामान्यविशेषितमेव ज्ञानं सुषुप्तावज्ञाननिरूपकं तर्हि तदेव तदा ज्ञानाभावनिरूपकमस्तु Nyāyāmṛ. 316B. 9.

**अज्ञाननिरोधित्व** ( ajñānanirodhi–tva ) *n.* the state of obstructing nescience अज्ञाननिरोधित्वलक्षणं प्रकाशकत्वं रूपं प्रत्येव AdvaiSi. 485. 2.

**अज्ञाननिर्भासा** ( ajñāna–nirbhāsā ) *adj.* (*f.*) manifesting non-cognition बुद्धिरज्ञाननिर्भासा तवाज्ञानं प्रकल्पितम् । ततश्च ज्ञानमेवैकमपोह्यत्वेन संमतम् S'lokaVār. 5(3). 139 (306. 3)